# नवमोऽङ्कः ।

( नेपथ्ये ।)

**प्रातर्बन्दिजनास्यप्रावृड्वारिदविनिःसृतैः सुखदैः ।।**
**बिरुदामृतैः प्रबुद्धः कृत्वाऽऽवश्यकमथागतः सम्राट् ।।१ ।।**

( ततः प्रविशति सपरिवारः सिंहासनस्थो हिरण्यकशिपुः ।)

**हिरण्यकशिपुः** - (प्रविश्य ।) भद्र विद्युद्दंष्ट्र समाकारणीयाश्चाराः ।

**विद्युद्दंष्ट्रः** - यदाज्ञापयति देवः । कः कोऽत्र भोः ।

**दौवारिकः** - (प्रविश्य ।) जयतु जयतु महाराजः । किमाज्ञापयति महाराजः ।

**विद्युद्दंष्ट्रः** - महाराजस्य निदेशात् समाकारणीयाश्चाराः ।

**दौवारिकः** - यदाज्ञापयति महाराजः ।

(इति निष्क्रम्य चारैः सह प्रविश्य ।)

जयतु जयतु देवः । सम्प्राप्ता एते चाराः ।

**हिरण्यकशिपुः** - भद्र विद्युद्दंष्ट्र प्रष्टव्यस्तावन्नगरवृत्तान्तः ।

**विद्युद्दंष्ट्रः** - यदाज्ञापयति देवः । भद्र श्रवणचतुर कथय तावत्पौरवृत्तान्तम् ।

**श्रवणचतुरः** - देव भवदाज्ञानुरोधात् परिभ्रमामि पूर्वस्यां दिशि तत्र सर्वेऽपि सुखिनो लोकाः वर्णयन्ति च महाराजस्य पराक्रमं प्रशंसन्ति चामात्यवर्गम् । नान्यत् किमपि जानामि । (इति निष्क्रान्तः ।)

**विद्युद्दंष्ट्रः** - भद्र सञ्चारचतुर कथय त्वमपि पौरवृत्तान्तम् ।

**सञ्चारचतुरः** - देव भवन्निदेशात् परिभ्रमामि दक्षिणस्यां दिशि । तत्र सर्वेऽपि जनाः सुखिनः वर्णयन्ति च महाराजस्य प्रभावम् । हृष्यन्ति च महाराजस्य श्रिया आधिक्यावलोकनेन । नान्यत् किमपि जानामि । (इति निष्क्रान्तः ।)

**विद्युद्दंष्ट्रः** - भद्र दृष्टिचतुर कथय तावत्त्वमपि पौरवृत्तान्तम् ।

**दृष्टिचतुरः** - देव भवदादेशवशात्परिभ्रमामि प्रतीच्यां दिशि। तत्र सर्वेऽपि सुखिनो जनाः वर्णयन्ति च महाराजस्य सौराज्यम्। प्रशंसन्ति च महाराजस्य प्रतापम्। नान्यत् किमपि जानामि। (इति निष्क्रान्तः।)

**विद्युद्दंष्ट्रः** - भद्र विचारचतुर त्वमप्येहि कथय तावत् पौरवृत्तान्तम्।

**विचारचतुरः** - देव भवदनुज्ञाकार्यहं परिभ्रमामि उत्तरस्यां दिशि। तत्र सर्वेऽपि जनाः सुखिनः वर्णयन्ति महाराजस्यानन्यसाधारणं शौर्यं प्रशंसन्ति च परिकरम्। किं बहुना कुमारस्याप्यलौकिकं कार्यं दृष्टं श्रुतं च। तेनातिहृष्यामि।

**विद्युद्दंष्ट्रः** - (सहर्षम्।) भद्र किं किं तत्कथय साकल्येन सर्वेऽपि वयं तच्छ्रवणे सोत्कण्ठाः स्मः।

**विचारचतुरः** - अस्ति किल बालोद्यानरक्षकस्य वारिवाहस्य मित्रं द्रुहिणदासः कुम्भकारः तस्य चास्ति विचारशून्या भार्या।

**विद्युद्दंष्ट्रः** - हुं ततस्ततः।

**विचारचतुरः** - तया गृहकृत्यनिरतया स्थापित आमभाण्डे निजबालकः।

**विद्युद्दंष्ट्रः** - हुं ततस्ततः।

**विचारचतुरः** - तेन च विचारमूढेनानवलोक्यैव स्थापितं तद्भाण्डमामभाण्डसमूहे पाचनाय प्रज्वालितश्च वह्निः।

**विद्युद्दंष्ट्रः** - अहह अनर्थोऽभूत्। ततस्ततः।

**विचारचतुरः** - ततो बालोद्याने स्वमित्रं वारिवाहमाकारयितुं स गतोऽपि न तेन समागतः।

**विद्युद्दंष्ट्रः** - हुं ततस्ततः।

**विचारचतुरः** - पश्चात्क्रीडानिरतेन कुमारेण स दृष्टः पृष्टश्च। तेन तु यथार्थतया सर्वं निवेदितम्।

**विद्युद्दंष्ट्रः** - हुं ततस्ततः।

**विचारचतुरः** - ततः कुमारेण किमप्युपदिष्टं तेन जीवितस्तद्बालक इति तेनैव सर्वं कथितं दृष्टश्च स बालको मया सजीवः।

**विद्युद्दंष्ट्रः** - (सहर्षम्।) अहो प्रभावो बाल्येऽपि कुमारस्य।

**विचारचतुरः** - नान्यत् किमपि जानामि। (इति निष्क्रान्तः।)

**हिरण्यकशिपुः** - (स्वगतम्। सहर्षम्।) अहो कीदृशोऽयं प्रभावोऽर्भकस्य। किंवा तेनोपदिष्टं भवेत्। भवतु तन्मुखेनैव स्फुटीभविष्यति। (प्रकाशम्।) भद्र विद्युद्दंष्ट्र श्रुतानुभावं कुमारम् अवलोकयितुं सूत्कण्ठते मे चेतस्तदाकारय तावत्कुमारम्।

**विद्युद्दंष्ट्रः** - (सहर्षम्।) यदाज्ञापयति देवः। कः कोऽत्र भोः।

(प्रविश्य।)

**दौवारिकः** - जयतु जयतु देवः। किमाज्ञापयति देवः।

**विद्युद्दंष्ट्रः** - भद्र देवस्य निदेशादाकारणीयः कुमारः।

**दौवारिकः** - देवादेशः प्रमाणम्। (इति निष्क्रम्य पुनः प्रविश्य।)

जयतु जयतु देवोऽयमागतः कुमारः।

(इति निष्क्रान्तः।)

(ततः प्रविशति धात्रीकरावलम्बी सालङ्कारः प्रह्लादः।)

(प्रविश्य।)

**धात्री** - वत्स कुलनन्दन पश्येदं सभास्थलद्वारम्। तत्र प्रविशतु भवान्। (इति सभास्थलद्वारप्रवेशं नाटयति।) वत्स पश्यायं महाराजस्तदुपसर्पतु भवान्।

**प्रह्लादः** - (शनैः शनैरुपसर्पति। सर्वेऽपि सभाजना उत्तिष्ठन्ति।)

**हिरण्यकशिपुः** - (तच्छोभामवलोक्य। सानन्दम्। स्वगतम्।)

**मणिगणनूपुररणितैः सुखयति कर्णं स्वशोभया नेत्रम्॥**
**वचनसुरचनामृतभरसेकैस्सरसं मनो विधास्यति मे ॥२॥**

(प्रकाशम्। सस्मितम्।) वत्स एहि।

**प्रह्लादः** - (साञ्जलिबन्धं समीपमुपसृत्य।) तात प्रणमाम्यहं प्रह्लादः। (इति पादयोः प्रणमति।)

**हिरण्यकशिपुः -** (शिरसि हस्तं निधाय सवात्सल्यम् ।) वत्स चिरञ्जीवी भव। (इत्याशिषं दत्वा स्वकराभ्यां प्रह्लादं धृत्वा निजोत्सङ्गे स्थापयति। मूर्द्ध्न्यवघ्राय मुखमवलोक्य ।) वत्स कुत आगतोऽसि।

**प्रह्लादः -** तात मातृसविधात् ।

**हिरण्यकशिपुः -** (वस्त्रालङ्कारानवलोक्य ।) वत्स केनालङ्कृतस्त्वम् ।

**प्रह्लादः -** मात्रैव।

**हिरण्यकशिपुः -** वत्स कथमत्रागतोऽसि।

**प्रह्लादः -** भवदाज्ञानुवशादुत्कण्ठितं च मम चेतो भवद्दर्शनाय।

**हिरण्यकशिपुः -** (श्रुत्वा। सहर्षम् । परिष्वज्य ।) वत्स मुखेन्दुवाक्सुधां सम्पिबन्न तृप्तिं लभे। तत्कथय द्रुहिणदासस्य कुम्भकारस्य पुत्रः केन प्रकारेण त्वया रक्षितः।

**प्रह्लादः -**

**न रक्षितास्मि तस्याहं रक्षिता स हरिः स्वयम् ।।**
**यो जगच्च जगद्यस्मादन्तर्यामीश्वरः परः ।।३।।**

**हिरण्यकशिपुः -** (सविस्मयम् । स्वगतम् ।) हन्त कथं परपक्षावलम्बिनी बुद्धिरस्य सञ्जाता । भवतु पृच्छया स्फुटीकरोमि। (प्रकाशम् ।) वत्स कस्ते प्रियः कानि मित्राणि किं ते करणीयम् । कस्ते गुरुः। तत्कथय।

**प्रह्लादः -**

**प्रेयान्मे हरिरनिशं मित्राणि प्रभुमयानि भूतानि ।।**
**करणीया हरिभक्तिः सर्वेषां शिक्षको हरिस्साक्षात् ।।४।।**

**हिरण्यकशिपुः -** (स्वगतम् । सखेदम् ।) हन्त हन्त दृढतराऽस्य बुद्धिस्सञ्जाता परपक्षे। तदनर्थतरः। (क्षणं विमृश्य ।) अलमलमस्मिन् क्रोधेन बालोऽयमपक्वबुद्धिश्च। तच्छिक्षयितव्यो गुरुभिः। (प्रकाशम् ।) वत्स उत्तिष्ठ याहि सदनं वदनं द्रष्टुमुत्कण्ठते ते माता।

**प्रह्लादः -** (उत्थाय प्रणम्य च ।) यथाज्ञा तातस्य ।

(इति धात्र्या सह निष्क्रान्तः।)

**हिरण्यकशिपुः** - भद्र विद्युद्दंष्ट्र समाकारणीया गुरवः।

**विद्युद्दंष्ट्रः** - यथाज्ञा महाराजस्य। कः कोऽत्र भोः।

(प्रविश्य।)

**दौवारिकः** - जयतु जयतु देवः। को वा आदेशो महाराजस्य।

**विद्युद्दंष्ट्रः** - भद्र समाकारणीया गुरवः।

**दौवारिकः** - देवादेशः प्रमाणम्। (इति निष्क्रम्य पुनः प्रविश्य।) जयतु जयतु देवः। नित्यं कृत्यं परिसमाप्य समागमिष्यन्ति गुरवः। साम्प्रतं पुत्रं वा शिष्यं प्रेषयिष्यन्ति। (इति निष्क्रान्तः।)

(ततः प्रविशति शण्डो विष्णुमित्रश्च।)

(प्रविश्य।)

**शण्डः** - वयस्य कथं महाराजेन सत्वरं तातचरणाः समाकारिताः। किंवा प्रयोजनं भवेत्।

**विष्णुमित्रः** - (सविचारम्।) किमपि प्रयोजनं भवेत्। (पुनः क्षणं विमृश्य।) न जाने कुम्भकारस्य किमपि वृत्तं ज्ञातं भवेत्। तर्हि कुमारस्य का वा व्यवस्था भवेत्। तेन शङ्कते मे चेतः।

**शण्डः** - अलमलं विचारेण स्फुटमग्रे भविष्यति। (पदान्तरं गत्वा।) अयं महाराजस्तदुपसर्पावः। (उपसृत्य।) जयतु जयतु महाराजः।

**हिरण्यकशिपुः** - गुरुपुत्र गुरुशिष्य अभिवादये।

**उभौ** - चिरायुरस्तु। साम्राज्यसमृद्धिरस्तु।

**हिरण्यकशिपुः** - आसनमासनम्।

**चेटः** - (प्रविश्य ।) इदमासनम्।

**हिरण्यकशिपुः** - गुरुपुत्र विष्णुमित्र स्थीयताम्।

**उभौ** - (तथा कृत्वा।) कथमाकारिता गुरवः।

**हिरण्यकशिपुः** - गुरुपुत्र किमप्यद्य श्रुतं कुमारस्य वृत्तम्। तेन परपक्षाश्रिता बुद्धिरस्य सञ्जातेति शङ्कते मे चेतस्तेन किं करणीयमधुनेति विचाराय समाकारिता गुरवः।

**उभौ** - (स्वगतम्।) यच्छङ्कितं तदेवोपस्थितम्। (प्रकाशम्।) महाराज एवं चेत्तर्हि नीतिः शिक्षणीया।

**हिरण्यकशिपुः** - एवमेव करणीयम्।

**शण्डः** - तर्हि शिक्षारम्भाय मुहूर्त्तं पश्यामि।

**हिरण्यकशिपुः** - अलमलं कालक्षेपकारिणा मुहूर्त्तेन। अस्मत्पितामहस्य भ्रातुर्भगवतोऽङ्गिरसः प्रमाणमुक्तिः। **मन उत्साहः** [?] इति।

(ततः प्रविशति शुक्रः।)

**शुक्रः** - (प्रविश्य। पदान्तरं गत्वाऽवलोक्य च।) अयं महाराजस्तदुपसर्पामि। (इत्युपसर्पति।)

**हिरण्यकशिपुः** - (दूरतोऽवलोक्य। उत्थाय।) भगवन् प्रणमामि ।

**शुक्रः** - चिरायुर्भव। साम्राज्यसुखं चोपभुङ्क्ष्व।

**हिरण्यकशिपुः** - भगवन् स्थीयतामासने।

**शुक्रः** - (तथा करोति।)

**हिरण्यकशिपुः** - (स्वयं च तिष्ठति।)

**शुक्रः** - राजन् कथमहमाकारितः।

**हिरण्यकशिपुः** - (सविनयम्।) भो भगवन्तः परावरज्ञेभ्यो भवद्भ्यः किं कथनीयमस्त्यथापि।

**सूक्ष्मं कण्टकसदृशं दुःखं यदपि प्रविष्टमथ हृदयम्।।**
**यत्नवशान्निःसार्यं दुनुयादनिशं न चेदविज्ञातम्।।५।।**

तेन कथयितुमाकारिता भवन्तः।

**शुक्रः** - राजन् कथ्यतां कथ्यताम्।

**हिरण्यकशिपुः -**

**परपक्षाश्रयणीयं बुद्धिर्बाल्ये कथं नु सञ्जाता ।।**
**प्रह्लादस्य न जाने तत्किं करणीयमाशु मे भूमन् ।।६।।**

**शुक्रः** - (क्षणं विमृश्य।) राजन् कृतं कृतमनेन दीर्घेण विचारेण शिक्षयाम्यहमेनम्।

**हिरण्यकशिपुः -** (सधैर्यम्।) इदमेव ममापि मनीषितम्।

**शुक्रः** - तर्हि सुदिनमवलोक्य प्रेषणीयः कुमारः।

**हिरण्यकशिपुः -** भगवन्नलमलं कालातिपातिना सुदिनविचारेण।

**गुरुप्रसादामृतसिञ्चिता ये**
**सर्वाणि तेषां सुदिनानि नूनम् ।।**
**तस्मात्कृपाब्धे त्वरया कुमारः**
**सद्वर्त्मलब्ध्यै परिशिक्षणीयः ।।७।।**

**शुक्रः** - हुं तर्हि सत्वरं प्रेषणीयः। अहं तावदाश्रमं गच्छामि ।

(इति पुत्रशिष्याभ्यां निष्क्रान्तः।)

**हिरण्यकशिपुः -** भद्र विद्युद्दंष्ट्र एहि तावद्देवीं कथयित्वा गुरुगृहं कुमारं प्रेषयामः।

(इति सपरिवारो निष्क्रान्तः।)

(ततः प्रविशति स्वाश्रमाविष्टः सशिष्योऽध्यापननिरतः शुक्रः सानुचरः प्रह्लादश्च।)

(प्रविश्य।)

**अनुचरः** - अहो गुरुभक्तिर्महाराजस्य। यत्त्रिलोकीश्वरोऽपि स्वतनयं पादचारिणं मदेकपरिजनं प्रेषयति गुरोः समीपम्।

**प्रह्लादः** - भद्र दर्शय तावद्गुरोराश्रमपदस्य मार्गम्।

**अनुचरः** - इत इतः। (पदान्तरं गत्वा।) कुमार पश्य गुरोः पुण्यमाश्रमपदम्। अस्मिन् किल क्वचिद्वेदमुखरा नव्यबटवः क्रीडन्ति। क्वचिच्छ्रुतिघोषपरा दिङ्मुखं घोषयन्ति। क्वचित् कर्मनिरता हुतद्रव्यधूमेनाधिवासयन्ति यज्ञशालाः। क्वचित् स्वयं मण्डिता ऋषिपत्न्यो मण्डयन्त्यङ्गणानि।

तदेहि तावत्प्रविशावः ।

(इति नाट्येन प्रविशतः ।)

(प्रविश्य ।)

**प्रह्लादः** - (गुरोः पादौ प्रगृह्य प्रणमति ।)

**गुरुः** - (सवात्सल्यम् ।) सद्विद्याविशारदो भव ।

**प्रह्लादः** - (साञ्जलिबन्धस्तिष्ठति ।)

**अनुचरः** - (गुरुं प्रणम्य ।) कुमार सज्जमिदं पूजासाहित्यम् ।

**प्रह्लादः** - (गुरुं तेन पूजयति ।)

**गुरुः** - वत्स पूजितोऽहं भृशं प्रसीदामि इति त्वत्कुलोचितमुपदिशामि । अवधारय तावन्मद्वचनम् ।

**प्रह्लादः** - भगवन् सावधानोऽस्मि । (इति साञ्जलिबन्धस्तिष्ठति ।)

**गुरुः** -

**स्वीयाः संरक्षणीया अरिकुलमनिशं नाशनीयं प्रयत्नात्**
**पूज्या विप्राः प्रमादः कथमपि मनसा वर्जनीयोऽर्जनीयः ।।**
**अर्थः सन्तर्ज्जनीयोऽनयकृतिनिपुणः प्रीणनीयाः प्रजाः स्वैः**
**शीलाचारादिभिश्च प्रतिदिनममलैर्माननीया हि वृद्धाः ।।८।।**

किञ्च ।

**उद्वाह्यातिकुलीना सच्छीला रूपसंयुता भार्या ।।**
**धर्माय भोगसिद्ध्यै वृद्ध्यै वंशस्य सौख्यदा सुभगा ।।९।।**

**प्रह्लादः** - (स्वगतम् ।) ब्रह्मिष्ठस्य विशेषतो वैष्णवस्य गुरोरस्मत्कुलोचितेयमुक्तिर्न तु पारमार्थिकी । (प्रकाशम् ।) भगवन्ममास्ति किञ्चिदत्र सन्देहः । स्वीयारिबुद्धिमन्तं सन्तो निन्दन्ति नैव नन्दन्ति ।

**शुक्रः** - (स्वगतम् ।) अहो आबाल्यात् पारमार्थिकी बुद्धिर्बालस्य । (प्रकाशम् ।) वत्स स्वीयारिविवेकशालिजननिन्दकाः सुखविधुरा भिक्षुकास्सन्तो [ सन्ति ] न तु महाराजाः । राजकुलस्य तु रीतिरियमेव यामहमुपदिशामि ।

**प्रह्लादः** - भगवन् विप्रा हरिपदनिरताः पूज्या नान्ये।

**शुक्रः** - वत्स सर्वेऽपि विप्रा हरिपदनिरता यतः प्रपञ्चरूपिणमपि तदुत्पत्तिस्थितिप्रलयहेतुं बुद्धिप्रेरकं स्वप्रकाशं पुरुषोत्तममहरहर्ध्यायन्ति गायत्रीमन्त्रेण।

**प्रह्लादः** - (सहर्षम्।) भगवन् तथ्यमुक्तम्। तर्हि पुरुषोत्तमप्राप्त्यै अर्थकामुका हेयाः।

**शुक्रः** - (स्वगतम्।) अहो परमार्थं वदता मया स्वारूढशाखाछेदनमिव कृतम्। (प्रकाशम्।) वत्स त्रिवर्गापादनमेव पुरुषोत्तमप्राप्त्युपायः। साम्राज्यसुखमेव 'पुरुषोत्तम'-शब्दवाच्यं यतो भूम्नः पुरुषोत्तमस्य सुखरूपत्वम् आह श्रुतिः।

**प्रह्लादः** - (सकरुणम्।) हन्त भगवन् कथं मुमुक्षुं मां मोहयसि। यतः साम्राज्यसुखं स्वल्पतरम्। पुरुषोत्तमस्तु निरवध्यानन्दात्मक इत्याह श्रुतिः।

**शुक्रः** - वत्साधुनालमलमनेन मुमुक्षुयोग्येन ब्रह्मविचारेण राजपुत्रस्य तव यतोऽनुभूतसर्वसुखेन चतुर्थे वयसि मुमुक्षुणा भवितव्यम्।

**प्रह्लादः** - भगवन्

**निस्सीमानन्दसन्दोहरूपं श्रीनन्दनन्दनम्।।**
**विहायान्यत्सुखं क्वास्ति स च लभ्यो मुमुक्षुभिः ।।१०।।**

**तस्मान्मुमुक्षुभिर्भाव्यं सदा सर्वसुखेच्छुभिः।।**
**दुःखसंवलितं त्याज्यं सुखं सद्भिः प्रयत्नतः ।।११।।**

**शुक्रः** - (स्वगतम्।) अहो सुदृढस्नेहो भगवत्यस्यार्भकस्य कथं वारयामि। (प्रकाशम्।) वत्स कृतं कृतमनेन वाक्ताण्डवेन बाल्यादपक्वा ते बुद्धिश्चिरं विद्याभ्यासेन पक्वा भविष्यति।

**प्रह्लादः** -

**अस्तु बुद्धिरपक्वा मे कृष्णपादानुसारिणी।।**
**मास्तु तद्विमुखा क्वापि त्वत्प्रसादाद्गुरो सदा।।१२।।**

**शुक्रः** - (सक्रोधमिव।) रे कुमार बोधितोऽपि मौखर्याद् न निवर्त्तसे। वत्स शण्ड सत्वरमेनं दैत्यबालकानामध्ययनशालां गत्वा बोधय यथोचितेन प्रकारेण। नोचेन्महाराजस्य क्रोधपात्रीभविष्यामः।

**शण्डः** - (सत्वरमुत्थाय प्रह्लादं करे गृहीत्वा।) कुमार एहि मया साकम्।

**प्रह्लादः** - (सचकितमुत्थाय गुरुं प्रणम्य तेन सह गच्छति। अनुचरश्च।)

**शण्डः** - भद्र त्वमत्रैव तिष्ठ।

**अनुचरः** - तथा। (इति तत्रैव तिष्ठति।)

**शण्डः** - (पदान्तरं गत्वा।) अयि कुमार त्वं बालोऽसि सुज्ञोऽसि भगवत्कृपया तत्कथमबुध इव भगवद्भावं प्रकाशयसि। स च गोप्यः प्रायः श्रुतयोऽपि पुरुषोत्तमं पारोक्ष्येण वर्णयन्ति। भगवतापि तथैवाज्ञप्तम् ''**परोक्षवादो वेदोऽयं**'' [भाग. पुरा. ११/३/४४] ''**परोक्षं मम च प्रियम्**'' [भाग. पुरा. ११/२१/३५] इति। अकोपनीयाश्च गुरवः।

**प्रह्लादः** - (सकरुणमिव।) ब्रह्मँस्तथ्यमुक्तम्। बालोऽहं क्षम्यतां क्षम्यताम्।

**शण्डः** - (पदान्तरं गत्वा।) कुमार इयं दैत्यबालकानां पाठशाला। इमे ते वयस्या अयं ते मित्रं विष्णुमित्रः। तद्गच्छतु भवान्पश्चादहमप्यागमिष्यामि।

**प्रह्लादः** - तथा। (इति निष्क्रान्तः।)

(शण्डः परावृत्य शुक्रसमीपं गच्छति।)

**शुक्रः** - वत्स क्वास्ति मर्क्कः।

**मर्क्कः** - अयमहमस्मि।

**शुक्रः** - वत्सौ भोजनावसरः प्राप्तस्तद्भोजनशालां गच्छामः। भद्र त्वमपि कुमारसमीपं गच्छ।

**अनुचरः** - तथा।

(इति निष्क्रान्ताः सर्वे।)

**।। इति श्रीनृसिंहविजये नवमोऽङ्कः ।।**